
हर हर शंकर ॐ जय जय शंकर

श्री-वेदव्यासाय नमः

## श्रीमद्-आद्य-शंकर-भगवत्पाद-परंपरागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-कांची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शंकराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरण-लघु-पूजा-पद्धतिः ॥

**५१२८ पराभवः-वृषभः-१७ / शांकर-संवत्सरः २५३५** (31.5.2026)

(आचम्य)

[विघ्नेश्वरपूजां कृत्वा।]

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये॥

प्राणान् आयम्य। (अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

मम उपात्त-समस्त-दुरित-क्षय-द्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीय-परार्धे श्वेतवराह-कल्पे वैवस्वत-मन्वंतरे अष्टाविंशतितमे कलि-युगे प्रथमे पादे जंबू-द्वीपे भारत-वर्षे भरतखंडे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **उत्तरायणे वसंत**-ऋतौ **वृषभ-अधिक-ज्यैष्ठ**-मासे **शुक्ल**-पक्षे (१४:१५) **पौर्णमास्यां** (१४:१५) शुभतिथौ **भानु**वासरयुक्तायाम् **अनुराधा**-नक्षत्रयुक्तायां **सिद्ध**-योगयुक्तायां

**बव**-करण (१४:१५; **बालव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **पौर्णमास्यां** (१४:१५) शुभतिथौ

- उत्तराषाढा-नक्षत्रे धनूराशौ आविर्भूतानां श्रीमत्-शंकर-विजयेंद्र-सरस्वती-श्रीपादानां, शतभिषङ्-नक्षत्रे कुंभ-राशौ आविर्भूतानां श्रीमत्-सत्य-चंद्रशेखरेंद्र-सरस्वती-श्रीपादानाम् अस्माकं जगद्गुरूणां दीर्घ-आयुः-आरोग्य-सिद्ध्यर्थं महात्रिपुरसुंदरी-समेतं चंद्रमौलीश्वरं संप्रार्थ्य,
- तैः संकल्पितानां सर्वेषां लोक-क्षेमार्थ-कार्याणां वेद-शास्त्रादि-संप्रदाय-पोषण-कार्याणां विविध-क्षेत्र-यात्राणां च अविघ्नतया संपूर्त्यर्थं
- कामकोटि-गुरु-परंपरायां कामकोटि-भक्त-जनानाम् अचंचल-भावशुद्ध-दृढतर-भक्ति-सिद्ध्यर्थं, परस्पर-ऐकमत्य-सिद्ध्यर्थं
- भारतीयानां महाजनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्-कार्येभ्यः निवृत्त्यर्थं
- भारतीयानां संततेः सनातन-संप्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुंबानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरण-प्रीत्यर्थं श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरण-जयंती-महोत्सवे यथाशक्ति-ध्यान-आवाहनादि-षोडशोपचारैः श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरण-पूजां करिष्ये। तदंगं कलशपूजां च करिष्ये।
[कलशपूजां कृत्वा।]

# ॥ ध्यानम् ॥

श्रुति-स्मृति-पुराणानाम् आलयं करुणालयम्।
नमामि भगवत्पाद-शंकरं लोक-शंकरम्॥

गामाक्रम्य पदेऽधिकांचि निबिडं स्कंधैश्चतुर्भिस्तथा
व्यावृण्वन् भुवनांतरं परिहरंस्तापं स-मोह-ज्वरम्।
यः शाखी द्विज-संस्तुतः फलति तत् स्वाद्यं रसाख्यं फलं
तस्मै शंकर-पादपाय महते तन्मस्-त्रि-संध्यं नमः॥

अज्ञानांतर्गहन-पतितान् आत्म-विद्योपदेशैः
त्रातुं लोकान् भव-दव-शिखा-ताप-पापच्यमानान्।
मुक्त्वा मौनं वट-विटपिनो मूलतो निष्पतंती
शंभोर्मूर्तिश्चरति भुवने शंकराचार्य-रूपा॥

अपारकरुणासिंधुं ज्ञानदं शांतरूपिणम्।
श्रीचंद्रशेखरगुरुं प्रणमामि मुदाऽन्वहम्॥

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणान् ध्यायामि। श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणान् आवाहयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, आसनं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, स्वागतं व्याहरामि। पूर्णकुंभं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, पाद्यं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, अर्घ्यं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, आचमनीयं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, मधुपर्कं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, स्नपयामि। स्नानानंतरम् आचमनीयं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, वस्त्रं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, यज्ञोपवीतं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, दिव्य-परिमलगंधान् धारयामि। गंधस्योपरि हरिद्राकुंकुमं समर्पयामि।

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

# ॥ श्रीमच्चंद्रशेखरेंद्रसरस्वतीश्रीचरणाष्टोत्तरशतनामावलिः ॥

श्री-चंद्रशेखरेंद्रास्मदाचार्याय नमो नमः
श्री-चंद्रमौलि-पादाब्ज-मधुपाय नमो नमः
आचार्य-पादाधिष्ठानाभिषिक्ताय नमो नमः
सर्वज्ञाचार्य-भगवत्-स्वरूपाय नमो नमः
अष्टांग-योग-सन्निष्ठा-गरिष्ठाय नमो नमः
सनकादि-महायोगि-सदृशाय नमो नमः
महादेवेंद्र-हस्ताब्ज-संजाताय नमो नमः
महायोगि-विनिर्भेद्य-महत्त्वाय नमो नमः
कामकोटि-महापीठाधीश्वराय नमो नमः
कलि-दोष-निवृत्त्येक-कारणाय नमो नमः १०
श्री-शंकर-पदांभोज-चिंतनाय नमो नमः
भारती-कृत-जिह्वाग्र-नर्तनाय नमो नमः
करुणा-रस-कल्लोल-कटाक्षाय नमो नमः
कांति-निर्जित-सूर्येंदु-कम्राभाय नमो नमः
अमंदानंद-कृन्मंद-गमनाय नमो नमः
अद्वैतानंद-भरित-चिद्-रूपाय नमो नमः
कटी-तट-लसच्चारु-काषायाय नमो नमः
कटाक्ष-मात्र-मोक्षेच्छा-जनकाय नमो नमः
बाहु-दंड-लसद्-वेणु-दंडकाय नमो नमः
फाल-भाग-लसद्-भूति-पुंड्रकाय नमो नमः २०
दर-हास-स्फुरद्-दिव्य-मुखाब्जाय नमो नमः
सुधा-मधुरिमामंजु-भाषणाय नमो नमः
तपनीय-तिरस्कारि-शरीराय नमो नमः
तपः-प्रभा-सदा-राजत्-सुनेत्राय नमो नमः

संगीतानंद-संदोह-सर्वस्वाय नमो नमः
संसारांबुधि-निर्मग्न-तारकाय नमो नमः
मस्तकोल्लासि-रुद्राक्ष-मकुटाय नमो नमः
साक्षात्-पर-शिवामोघ-दर्शनाय नमो नमः
चक्षुर्गत-महा-तेजोत्युज्ज्वलाय नमो नमः
साक्षात्-कृत-जगन्मातृ-स्वरूपाय नमो नमः ३०
क्व-चिद्-बाल-जनात्यंत-सुलभाय नमो नमः
क्व-चिन्महा-जनातीव-दुष्प्रापाय नमो नमः
गो-ब्राह्मण-हितासक्त-मानसाय नमो नमः
गुरु-मंडल-संभाव्य-विदेहाय नमो नमः
भावना-मात्र-संतुष्ट-हृदयाय नमो नमः
भाव्यातिभाव्य-दिव्य-श्री-पदाब्जाय नमो नमः
व्यक्ताव्यक्ततरानेक-चित्-कलाय नमो नमः
रक्त-शुक्ल-प्रभा-मिश्र-पादुकाय नमो नमः
भक्त-मानस-राजीव-भवनाय नमो नमः
भक्त-लोचन-राजीव-भास्कराय नमो नमः ४०
भक्त-कामलता-कल्पपादपाय नमो नमः
भुक्ति-मुक्ति-प्रदानेक-शक्ति-दाय नमो नमः
शरणागत-दीनार्त-रक्षकाय नमो नमः
शमादि-षट्क-संपत्-प्रदायकाय नमो नमः
सर्वदा सर्वथा लोक-सौख्य-दाय नमो नमः
सदा नव-नवाकांक्ष्य-दर्शनाय नमो नमः
सर्व-हृत्-पद्म-संचार-निपुणाय नमो नमः
सर्वेंगित-परिज्ञान-समर्थाय नमो नमः
स्वप्न-दर्शन-भक्तेष्ट-सिद्धि-दाय नमो नमः
सर्व-वस्तु-विभाव्यात्म-सद्-रूपाय नमो नमः ५०
दीन-भक्तावनैकांत-दीक्षिताय नमो नमः
ज्ञान-योग-बलैश्वर्य-मानिताय नमो नमः
भाव-माधुर्य-कलिताभय-दाय नमो नमः

सर्व-भूत-गणामेय-सौहार्दाय नमो नमः
मूकी-भूतानेक-लोक-वाक्-प्रदाय नमो नमः
शीतली-कृत-हृत्-ताप-सेवकाय नमो नमः
भोग-मोक्ष-प्रदानेक-योग-ज्ञाय नमो नमः
शीघ्र-सिद्धि-करानेक-शिक्षणाय नमो नमः
अमानित्वादि-मुख्यार्थ-सिद्धि-दाय नमो नमः
अखंडैक-रसानंद-प्रबोधाय नमो नमः ६०
नित्यानित्य-विवेक-प्रदायकाय नमो नमः
प्रत्यगेक-रसाखंड-चित्-सुखाय नमो नमः
इहामुत्रार्थ-वैराग्य-सिद्धि-दाय नमो नमः
महा-मोह-निवृत्त्यर्थ-मंत्र-दाय नमो नमः
क्षेत्र-क्षेत्रज्ञ-प्रत्येक-दृष्टि-दाय नमो नमः
क्षय-वृद्धि-विहीनात्म-सौख्य-दाय नमो नमः
तूलाज्ञान-विहीनात्म-तृप्ति-दाय नमो नमः
मूलाज्ञानाबाधितात्म-मुक्ति-दाय नमो नमः
भ्रांति-मेघोच्चाटन-प्रभंजनाय नमो नमः
शांति-वृष्टि-प्रदामोघ-जल-दाय नमो नमः ७०
एक-काल-कृतानेक-दर्शनाय नमो नमः
एकांत-भक्त-संवेद्य-स्वगताय नमो नमः
श्रीचक्र-रथ-निर्माण-सुप्रथाय नमो नमः
श्री-कल्याण-करामेय-सुश्लोकाय नमो नमः
आश्रिताश्रयणीयत्व-प्रापकाय नमो नमः
अखिलांडेश्वरी-कर्ण-भूषकाय नमो नमः
सशिष्य-गण-यात्रा-विधायकाय नमो नमः
साधु-संघ-नुतामेय-चरणाय नमो नमः
अभिन्नात्मैक्य-विज्ञान-प्रबोधाय नमो नमः
भिन्नाभिन्न-मतैश्चापि पूजिताय नमो नमः ८०
तत्-तद्-विपाक-सद्-बोध-दायकाय नमो नमः
तत्-तद्-भाषा-प्रकटित-स्व-गीताय नमो नमः

तत्र-तत्र-कृतानेक-सत्-कार्याय नमो नमः
चित्र-चित्र-प्रभाव-प्रसिद्धिकाय नमो नमः
लोकानुग्रह-कृत्-कर्म-निष्ठिताय नमो नमः
लोकोद्धृति-महा-भूरि-नियमाय नमो नमः
सर्व-वेदांत-सिद्धांत-सम्मताय नमो नमः
कर्म-ब्रह्मात्म-करण-मर्म-ज्ञाय नमो नमः
वर्णाश्रम-सदाचार-रक्षकाय नमो नमः
धर्मार्थ-काम-मोक्ष-प्रदायकाय नमो नमः ९०
पद-वाक्य-प्रमाणादि-पारीणाय नमो नमः
पाद-मूल-नतानेक-पंडिताय नमो नमः
वेद-शास्त्रार्थ-सद्-गोष्ठी-विलासाय नमो नमः
वेद-शास्त्र-पुराणादि-विचाराय नमो नमः
वेद-वेदांग-तत्त्व-प्रबोधकाय नमो नमः
वेद-मार्ग-प्रमाण-प्रख्यापकाय नमो नमः
निर्णिद्र-तेजोविजित-निद्राढ्याय नमो नमः
निरंतर-महानंद-संपूर्णाय नमो नमः
स्वभाव-मधुरोदार-गांभीर्याय नमो नमः
सहजानंद-संपूर्ण-सागराय नमो नमः १००
नाद-बिंदु-कलातीत-वैभवाय नमो नमः
वाद-भेद-विहीनात्म-बोधकाय नमो नमः
द्वादशांत-महा-पीठ-निषण्णाय नमो नमः
देश-कालापरिच्छिन्न-दृग्-रूपाय नमो नमः
निर्मान-शांति-महित-निश्चलाय नमो नमः
निर्लक्ष्य-लक्ष्य-संलक्ष्य-निर्लेपाय नमो नमः
श्री-षोडशांत-कमल-सुस्थिताय नमो नमः
श्री-चंद्रशेखरेंद्र-श्री-सरस्वत्यै नमो नमः १०८

॥ इति वलंगैमान्-ग्रामाभिजनेन हरिहरशास्त्रिसूनुना सुब्रह्मण्यशास्त्रिणा विरचिता श्रीमच्चंद्रशेखरेंद्रसरस्वतीश्रीचरणाष्टोत्तरशतनामावलिः संपूर्णा ॥

# आचार्यपरंपरानामावलिः

## ॥ पूर्वाचार्याः ॥

1. श्रीमते दक्षिणामूर्तये नमः
2. श्रीमते विष्णवे नमः
3. श्रीमते ब्रह्मणे नमः
4. श्रीमते वसिष्ठाय नमः
5. श्रीमते शक्तये नमः
6. श्रीमते पराशराय नमः
7. श्रीमते व्यासाय नमः
8. श्रीमते शुकाय नमः
9. श्रीमते गौडपादाय नमः
10. श्रीमते गोविंद-भगवत्पादाय नमः
11. श्रीमते शंकर-भगवत्पादाय नमः

## ॥ भगवत्पादशिष्याः ॥

1. श्रीमते सुरेश्वराचार्याय नमः
2. श्रीमते पद्मपादाचार्याय नमः
3. श्रीमते हस्तामलकाचार्याय नमः
4. श्रीमते तोटकाचार्याय नमः
5. श्रीमते पृथिवीधवाचार्याय नमः
6. श्रीमते सर्वज्ञात्म-इंद्रसरस्वत्यै नमः
7. अन्येभ्यः शंकरभगवत्पाद-शिष्येभ्यो नमः

## ॥ कामकोटि-आचार्याः ॥

1. श्रीमते शंकरभगवत्पादाय नमः
2. श्रीमते सुरेश्वराचार्याय नमः
3. श्रीमते सर्वज्ञात्म-इंद्रसरस्वत्यै नमः
4. श्रीमते सत्यबोध-इंद्रसरस्वत्यै नमः
5. श्रीमते ज्ञानानंद-इंद्रसरस्वत्यै नमः

6. श्रीमते शुद्धानंद-इंद्रसरस्वत्यै नमः
7. श्रीमते आनंदज्ञान-इंद्रसरस्वत्यै नमः
8. श्रीमते कैवल्यानंद-इंद्रसरस्वत्यै नमः
9. श्रीमते कृपाशंकर-इंद्रसरस्वत्यै नमः
10. श्रीमते विश्वरूप-सुरेश्वर-इंद्रसरस्वत्यै नमः
11. श्रीमते शिवानंद-चिद्धन-इंद्रसरस्वत्यै नमः
12. श्रीमते सार्वभौम-चंद्रशेखर-इंद्रसरस्वत्यै नमः
13. श्रीमते काष्ठमौन-सच्चिद्धन-इंद्रसरस्वत्यै नमः
14. श्रीमते भैरवजिद्-विद्याघन-इंद्रसरस्वत्यै नमः
15. श्रीमते गीष्पति-गंगाधर-इंद्रसरस्वत्यै नमः
16. श्रीमते उज्ज्वलशंकर-इंद्रसरस्वत्यै नमः
17. श्रीमते गौड-सदाशिव-इंद्रसरस्वत्यै नमः
18. श्रीमते सुर-इंद्रसरस्वत्यै नमः
19. श्रीमते मार्तंड-विद्याघन-इंद्रसरस्वत्यै नमः
20. श्रीमते मूकशंकर-इंद्रसरस्वत्यै नमः
21. श्रीमते जाह्नवी-चंद्रचूड-इंद्रसरस्वत्यै नमः
22. श्रीमते परिपूर्णबोध-इंद्रसरस्वत्यै नमः
23. श्रीमते सच्चित्सुख-इंद्रसरस्वत्यै नमः
24. श्रीमते कोंकण-चित्सुख-इंद्रसरस्वत्यै नमः
25. श्रीमते सच्चिदानंदघन-इंद्रसरस्वत्यै नमः
26. श्रीमते प्रज्ञाघन-इंद्रसरस्वत्यै नमः
27. श्रीमते चिद्विलास-इंद्रसरस्वत्यै नमः
28. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
29. श्रीमते पूर्णबोध-इंद्रसरस्वत्यै नमः
30. श्रीमते भक्तियोग-बोध-इंद्रसरस्वत्यै नमः
31. श्रीमते शीलनिधि-ब्रह्मानंदघन-इंद्रसरस्वत्यै नमः
32. श्रीमते चिदानंदघन-इंद्रसरस्वत्यै नमः
33. श्रीमते भाषापरमेष्ठि-सच्चिदानंदघन-इंद्रसरस्वत्यै नमः
34. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
35. श्रीमते बहुरूप-चित्सुख-इंद्रसरस्वत्यै नमः
36. श्रीमते चित्सुखानंद-इंद्रसरस्वत्यै नमः

37. श्रीमते विद्याघन-इंद्रसरस्वत्यै नमः
38. श्रीमते धीरशंकर-इंद्रसरस्वत्यै नमः
39. श्रीमते सच्चिद्विलास-इंद्रसरस्वत्यै नमः
40. श्रीमते शोभन-महादेव-इंद्रसरस्वत्यै नमः
41. श्रीमते गंगाधर-इंद्रसरस्वत्यै नमः
42. श्रीमते ब्रह्मानंदघन-इंद्रसरस्वत्यै नमः
43. श्रीमते आनंदघन-इंद्रसरस्वत्यै नमः
44. श्रीमते पूर्णबोध-इंद्रसरस्वत्यै नमः
45. श्रीमते परमशिव-इंद्रसरस्वत्यै नमः
46. श्रीमते सांद्रानंद-बोध-इंद्रसरस्वत्यै नमः
47. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
48. श्रीमते अद्वैतानंदबोध-इंद्रसरस्वत्यै नमः
49. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
50. श्रीमते चंद्रचूड-इंद्रसरस्वत्यै नमः
51. श्रीमते विद्यातीर्थ-इंद्रसरस्वत्यै नमः
52. श्रीमते शंकरानंद-इंद्रसरस्वत्यै नमः
    - श्रीमते अद्वैतब्रह्मानंदाय नमः
    - श्रीमते विद्यारण्याय नमः
    - अन्येभ्यः विद्यातीर्थ-शंकरानंद-शिष्येभ्यो नमः
53. श्रीमते पूर्णानंद-सदाशिव-इंद्रसरस्वत्यै नमः
54. श्रीमते व्यासाचल-महादेव-इंद्रसरस्वत्यै नमः
55. श्रीमते चंद्रचूड-इंद्रसरस्वत्यै नमः
56. श्रीमते सदाशिवबोध-इंद्रसरस्वत्यै नमः
57. श्रीमते परमशिव-इंद्रसरस्वत्यै नमः
    - श्रीमते सदाशिवब्रह्म-इंद्रसरस्वत्यै नमः
58. श्रीमते विश्वाधिक-आत्मबोध-इंद्रसरस्वत्यै नमः
59. श्रीमते भगवन्नाम-बोध-इंद्रसरस्वत्यै नमः
60. श्रीमते अद्वैतात्मप्रकाश-इंद्रसरस्वत्यै नमः
61. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
62. श्रीमते शिवगीतिमाला-चंद्रशेखर-इंद्रसरस्वत्यै नमः

63. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
64. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
65. श्रीमते सुदर्शन-महादेव-इंद्रसरस्वत्यै नमः
66. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
67. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
68. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
69. श्रीमते जयेंद्रसरस्वत्यै नमः
70. श्रीमते शंकरविजयेंद्रसरस्वत्यै नमः
71. श्रीमते सत्य-चंद्रशेखरेंद्रसरस्वत्यै नमः

श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, नानाविधपरिमलपत्रपुष्पाणि समर्पयामि।
श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, धूपम् आघ्रापयामि।
श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, दीपं दर्शयामि।
श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, अमृतं महानैवेद्यं पानीयं च निवेदयामि। निवेदनानंतरम् आचमनीयं समर्पयामि।
श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, कर्पूरतांबूलं समर्पयामि।
श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, मंगलनीराजनं दर्शयामि।
श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रदक्षिणनमस्कारान् समर्पयामि।
श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रार्थनाः समर्पयामि।

## ॥ स्वस्ति-वचनम् ॥

- स्वस्ति श्रीमद्-अखिल-भूमंडलालंकार-त्रयस्त्रिंशत्-कोटि-देवता-सेवित-श्री-कामाक्षी-देवी-सनाथ-श्रीमद्-एकाम्रनाथ-श्री-महादेवी-सनाथ-श्री-हस्तिगिरिनाथ-साक्षात्कार-परमाधिष्ठान-सत्यव्रत-नामांकित-कांची-दिव्य-क्षेत्रे शारदामठ-सुस्थितानाम्
- अतुलित-सुधारस-माधुर्य-कमलासन-कामिनी-धम्मिल्ल-संफुल्ल-मल्लिका-मालिका-निःष्यंद-मकरंद-झरी-सौवस्तिक-वाङ्निगुंफ-विजृंभणानंद-तुंदिलित-मनीषि-मंडलानाम्
- अनवरताद्वैत-विद्या-विनोद-रसिकानां निरंतरालंकृतीकृत-शांति-दांति-भूम्नाम्

- सकल-भुवन-चक्र-प्रतिष्ठापक-श्रीचक्र-प्रतिष्ठा-विख्यात-यशोऽलंकृतानाम्
- निखिल-पाषंड-षंड-कंटकोत्पाटनेन विशदीकृत-वेद-वेदांत-मार्ग-षण्मत-प्रतिष्ठापकाचार्याणाम्
- परमहंस-परिव्राजकाचार्यवर्य-जगद्गुरु-श्रीमत्-शंकरभगवत्पादाचार्याणाम्
- अधिष्ठाने सिंहासनाभिषिक्त-श्रीमद्-जयेंद्र-सरस्वती-श्रीपादानाम्
- अंतेवासि-वर्य-श्रीमत्-शंकरविजयेंद्र-सरस्वती-श्रीपादानां
- तदंतेवासि-वर्य-श्रीमत्-सत्य-चंद्रशेखरेंद्र-सरस्वती-श्रीपादानां च
- चरण-नलिनयोः स-प्रश्रयं सांजलि-बंधं च नमस्कुर्मः ॥

# ॥ श्रीचंद्रशेखरेंद्रसरस्वती-श्रीचरण-विषये श्रीमच्छंकरविजयेंद्रसरस्वतीश्रीचरणैः विरचितं सद्गुरु-दशकम् ॥

श्रुति-स्मृति-पुराणोक्त-धर्म-मार्ग-रतं गुरुम्।
भक्तानां हित-वक्तारं नमस्ये चित्त-शुद्धये॥ १ ॥

अद्वैतानंद-भरितं साधूनाम् उपकारिणम्।
सर्व-शास्त्र-विदं शांतं नमस्ये चित्त-शुद्धये॥ २ ॥

कर्म-भक्ति-ज्ञान-मार्ग-प्रचारे बद्ध-कंकणम्।
अनुग्रह-प्रदातारं नमस्ये चित्त-शुद्धये॥ ३ ॥

भगवत्पाद-पादाब्ज-विनिवेशित-चेतसः ।
श्री-चंद्रशेखर-गुरोः प्रसादो मयि जायताम्॥ ४ ॥

क्षेत्र-तीर्थ-कथाभिज्ञः सच्चिदानंद-विग्रहः।
चंद्रशेखर-वर्यो मे सन्निधत्तां सदा हृदि॥ ५ ॥

पोषणे वेद-शास्त्राणां दत्त-चित्तमहर्-निशम्।
क्षेत्र-यात्रा-रतं वंदे सद्-गुरुं चंद्रशेखरम्॥ ६ ॥

वेद-ज्ञान् वेदभाष्य-ज्ञान् कर्तुं यस्य समुद्यमः।
गुरुर्यस्य महादेवः तं वंदे चंद्रशेखरम्॥ ७ ॥

मणिवाचक-गोदादि-भक्ति-वागमृतैर्-भृशम्।
बालानां भगवद्-भक्तिं वर्धयंतं गुरुं भजे॥८॥

लघूपदेशैर्-नास्तिक्य-भाव-मर्दन-कोविदम् ।
शिवं स्मित-मुखं शांतं प्रणतोऽस्मि जगद्-गुरुम्॥९॥

विनयेन प्रार्थयेऽहं विद्यां बोधय मे गुरो।
मार्गमन्यं न जानेऽहं भवंतं शरणं गतः॥१०॥

॥ इति श्रीचंद्रशेखरेंद्रसरस्वती-श्रीचरण-विषये
श्रीमच्छंकरविजयेंद्रसरस्वतीश्रीचरणैः विरचितं सद्गुरु-दशकम् ॥

# ॥ तोटकाष्टकम् ॥

विदिताखिल-शास्त्र-सुधा-जलधे
महितोपनिषत्-कथितार्थ-निधे।
हृदये कलये विमलं चरणं
भव शंकर देशिक मे शरणम्॥१॥

करुणा-वरुणालय पालय मां
भव-सागर-दुःख-विदून-हृदम्।
रचयाखिल-दर्शन-तत्त्व-विदं
भव शंकर देशिक मे शरणम्॥२॥

भवता जनता सुहिता भविता
निज-बोध-विचारण-चारु-मते।
कलयेश्वर-जीव-विवेक-विदं
भव शंकर देशिक मे शरणम्॥३॥

भव एव भवानिति मे नितरां
समजायत चेतसि कौतुकिता।
मम वारय मोह-महा-जलधिं
भव शंकर देशिक मे शरणम्॥४॥

सुकृतेऽधिकृते बहुधा भवतो
भविता सम-दर्शन-लालसता।
अति-दीनमिमं परिपालय मां
भव शंकर देशिक मे शरणम्॥५॥

जगतीमवितुं कलिताकृतयो
विचरंति महा-महसश्छलतः।
अहिमांशुरिवात्र विभासि पुरो*
भव शंकर देशिक मे शरणम्॥६॥

गुरु-पुंगव पुंगव-केतन ते
समतामयतां न हि कोऽपि सुधीः।
शरणागत-वत्सल तत्त्व-निधे
भव शंकर देशिक मे शरणम्॥७॥

विदिता न मया विशदैक-कला
न च किंचन कांचनमस्ति गुरो।
द्रुतमेव विधेहि कृपां सह-जां
भव शंकर देशिक मे शरणम्॥८॥
॥इति श्री-तोटकाचार्यविरचितं श्री-तोटकाष्टकं संपूर्णम्॥

[* गुरो इति पाठांतरम्]

जय जय शंकर हर हर शंकर
जय जय शंकर हर हर शंकर।
कांची-शंकर कामकोटि-शंकर
हर हर शंकर जय जय शंकर॥

कायेन वाचा मनसेंद्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥
अनेन पूजनेन श्री-चंद्रशेखरेंद्र-सरस्वती-श्रीचरणाः प्रीयंताम्।
ॐ तत्सद्ब्रह्मार्पणमस्तु।

❁

# ॥ श्रीकांचीकामकोटिपीठजगद्गुरुपरंपरास्तवः ॥

(पंचषष्टितमैः पीठाधिपतिभिः श्रीमत्सुदर्शनमहादेवेंद्रसरस्वतीश्रीचरणैः प्रणीतः)

नारायणं पद्मभुवं वसिष्ठं
शक्तिं च तत्पुत्रपराशरं च।
व्यासं शुकं गौडपदं महांतं
गोविंदयोगींद्रमथास्य शिष्यम्॥ १ ॥

श्रीशंकराचार्यमथास्य पद्म-
पादं च हस्तामलकं च शिष्यम्।
तं तोटकं वार्तिककारमन्यान्
अस्मद्गुरून् संततमानतोऽस्मि॥ २ ॥

सदाशिवसमारंभां शंकराचार्यमध्यमाम्।
अस्मदाचार्यपर्यंतां वंदे गुरुपरंपराम्॥ ३ ॥

सर्वतंत्रस्वतंत्राय सदाऽऽत्माद्वैतवेदिने।
श्रीमते शंकरार्याय वेदांतगुरवे नमः॥ ४॥

अविप्लुतब्रह्मचर्यान् अन्वितेंद्रसरस्वतीन्।
आत्तमिथ्यावारपथान् अद्वैताचार्यसंकथान्॥ ५॥

आसेतुहिमवच्छैलं सदाचारप्रवर्तकान्।
जगद्गुरून् स्तुमः कांचीशारदामठसंश्रयान्॥ ६ ॥

पवित्रितेतराद्वैतमठपीठीशिरोभुवे ।
श्रीकांचीशारदापीठगुरवे भवभीरवे॥ ७॥

वार्तिकादिब्रह्मविद्याकर्त्रे ब्रह्मावतारिणे।
सुरेश्वराचार्यनाम्ने योगींद्राय नमो नमः॥ ८॥

अपोऽश्नन्नेव जैनान् य आप्राग्ज्योतिषमाच्छिनत्।
शिशुमाचार्यवाग्वेणीरयरोधिमहोबलम् ॥ ९॥

संक्षेपशारीरमुखप्रबंधविवृताद्वयम् ।
ब्रह्मस्वरूपार्यभाष्यशांत्याचार्यकपंडितम्॥ १० ॥

सर्वज्ञचंद्रनाम्ना च सर्वतो भुवि विश्रुतम्।
सर्वज्ञसद्गुरुं वंदे सर्वज्ञमिव भूगतम्॥ ११ ॥

मेधाविनं सत्यबोधं व्याधूतविमतोच्चयम्।
प्राच्यभाष्यत्रयव्याख्याप्रवीणं प्रभुमाश्रये॥ १२ ॥

ज्ञानानंदमुनींद्रार्यं ज्ञानोत्तमपराभिधम्।
चंद्रचूडपदासक्तं चंद्रिकाकृतमाश्रये॥ १३ ॥

शुद्धानंदमुनींद्राणां विद्धार्हतमतत्विषाम्।
आनंदज्ञानसेव्यानाम् आलंबे चरणांबुजम्॥ १४॥

सर्वशांकरभाष्यौघभाष्यकर्तारमद्वयम्।
सर्ववार्तिकसद्वृत्तिकृतं श्रीशैलगं भजे॥ १५॥

कैवल्यानंदयोगींद्रान् केवलं राजयोगिनः।
कैवल्यमात्रनिरतान् कलयेम जगद्गुरून्॥ १६ ॥

श्रीकृपाशंकरार्याणां मर्यादातीततेजसाम्।
षण्मताचार्यकजुषाम् अंघ्रिद्वंद्वमहं श्रये॥ १७॥

महिष्ठाय नमस्तस्मै महादेवाय योगिने।
सुरेश्वरापराख्याय गुरवे दोषभीरवे॥ १८॥

स्तुमः सदा शिवानंदचिद्घनेंद्रसरस्वतीन्।
कामाक्षीचंद्रमौल्यर्चाकलनैकलसन्मतीन्॥ १९ ॥

सार्वभौमाभिधमहाव्रतचर्यापरायणान्।
वंदे जगद्गुरूंश्चंद्रशेखरेंद्रसरस्वतीन्॥ २० ॥

समाद्वात्रिंशदत्युग्रकाष्ठमौनसमाश्रयान् ।
जितमृत्यून् महालिंगभूतान् सच्चिद्घनान् नुमः ॥ २१ ॥

महाभैरवदुस्तंत्रदुर्दांतध्वांतभास्करान् ।
विद्याघनान् नमस्यामि सर्वविद्याविचक्षणान्॥ २२॥

आचार्यपदपाथोजपरिचर्यापरायणम् ।
गंगाधरं नमस्यामः सदा गंगाधरार्चकम्॥ २३॥

जगज्जयिसुसौराष्ट्रजरदृष्टिमदापहान् ।
शकसिल्हकदर्पघ्नान् ईडीमहि महायतीन्॥ २४॥

चतुस्समुद्रीक्रोडस्थवर्णाश्रमविचारकान्।
श्रितविप्रव्रजस्कंधसुवर्णांदोलिकाचरान् ॥ २५॥

प्रत्यहं ब्रह्मसाहस्रसंतर्पणधृतव्रतान्।
सदाशिवसमाह्वानान् स्मरामः सद्गुरून् सदा॥ २६॥

मायालोकायतीभूतबृहस्पतिमदापहान्।
वंदे सुरेंद्रवंद्यांघ्रीन् श्रीसुरेंद्रसरस्वतीन्॥ २७॥

श्रीविद्याकरुणालब्धब्रह्मविद्याहृतामयान् ।
वंदे वशंवदप्राणान् मुनीन् विद्याघनान् मुहुः॥ २८॥

विद्याघनकृपालब्धसर्ववेदांतविस्तरम् ।
कौतस्कुतोत्पातकेतुं निश्शंकं नौमि शंकरम्॥ २९॥

चंद्रचूडपदध्यानप्राप्तानंदमहोदधीन् ।
यतींद्रांश्चंद्रचूडेंद्रान् स्मरामि मनसा सदा॥ ३०॥

नमामि परिपूर्णश्रीबोधान् ग्रावाभिलापकान्।
यदीक्षणात् पलायंत प्राणिनामामयाधयः॥ ३१॥

सच्चित्सुखान् प्रपद्येऽहं सुखम् आप्तगुहास्थितीन्।
चित्सुखाचार्यमीडेऽहं सत्सुखं कोंकणाश्रयम्॥ ३२॥

भजे श्रीसच्चिदानंदघनेंद्रान् रससाधनात्।
लिंगात्मना परिणतान् प्रभासे योगसंश्रिते॥ ३३॥

भगवत्पादपादाब्जासक्तिनिर्णिक्तमानसान्।
प्रज्ञाघनं चिद्विलासं महादेवं च मैथिलम्॥ ३४॥

पूर्णबोधं च बोधं च भक्तियोगप्रवर्तकम्।
ब्रह्मानंदघनेंद्रं च नमामि नियतात्मनः॥ ३५॥

चिदानंदघनेंद्राणां लंबिकायोगसेविनाम्।
जीर्णपर्णाशिनां पादौ प्रपद्ये मनसा सदा॥ ३६॥

सच्चिदानंदनामानं शिवार्चनपरायणम्।
भाषापंचदशीप्राज्ञं भावयामि सदा मुदा॥ ३७॥

भूप्रदक्षिणकर्मैकसक्तं श्रीचंद्रशेखरम्।
त्रातदावाग्निसंदग्धकिशोरकमुपास्महे॥ ३८॥

चित्सुखेंद्रं सुखेनैव क्रांतसह्यगुहागृहम्।
कामरूपचरं नानारूपवंतमुपास्महे॥ ३९॥

निर्दोषसंयमधरान् चित्सुखानंदतापसान्।
विद्याघनेंद्रान् श्रीविद्यावशीकृतजनान् स्तुमः॥ ४०॥

शंकरेंद्रयतींद्राणां पादुके ब्रह्मसंभृते।
नमामि शिरसा याभ्यां त्रीन् लोकान् व्यचरन्मुनिः॥ ४१॥

सच्चिद्विलासयोगींद्रं महादेवेंद्रमुज्ज्वलम्।
गंगाधरेंद्रमप्येतान् नौमि वादिशिरोमणीन्॥ ४२॥

ब्रह्मानंदघनेंद्राख्यांस्तथाऽऽनंदघनान् अपि।
पूर्णबोधमहर्षींश्च ज्ञाननिष्ठानुपास्महे॥ ४३॥

वृत्त्याऽऽजगर्या श्रीशैलगुहागृहकृतस्थितीन्।
श्रीमत्परशिवाभिख्यान् सर्वातीतान् श्रये सदा॥ ४४॥

अन्योन्यसदृशान्योन्यौ बोधश्रीचंद्रशेखरौ।
प्रणवोपासनासक्तमानसौ मनसा श्रये॥ ४५॥

मुक्तिलिंगार्चनानंदविस्मृताशेषवृत्तये।
चिदंबररहस्यंतर्लीनदेहाय योगिने॥ ४६ ॥

अद्वैतानंदसाम्राज्यविद्रुताशेषपाप्मने।
अद्वैतानंदबोधाय नमो ब्रह्म समीयुषे॥ ४७॥

श्रये महादेवचंद्रशेखरेंद्रमहामुनी।
महाव्रतसमारब्धकोटिहोमांतगामिनौ॥ ४८॥

विद्यातीर्थसमाह्वानान् श्रीविद्यानाथयोगिनः।
विद्यया शंकरप्रख्यान् विद्यारण्यगुरून् भजे॥ ४९॥

सच्चिद्घनेंद्रान् अद्वैतब्रह्मानंदमुनीनपि।
सांद्रानंदयतींद्रांश्च तथाप्यद्वैतशेवधीन्॥ ५०॥

महादेवशिवाद्वैतसुखानंदयतीश्वरौ ।
मनसा भावये नित्यं महासंयमधारिणौ॥ ५१॥

वीक्षणात् सर्वभूतानां विषव्याधिनिबर्हणम्।
शिवयोगीश्वरं साक्षाच्चिंतयामि सदा मुदा॥ ५२॥

प्रत्यग्ज्योतिःप्रकाशेंद्रान् प्रत्यग्ज्योतिरुपासिनः।
न्यक्कृताशेषदुस्तर्ककार्कश्यान् सततं स्तुमः॥ ५३॥

शंकरानंदयोगींद्रपदपंकजयोर्युगम् ।
बुक्कभूपशिरोरत्नं स्मरामि सततं हृदा॥ ५४॥

श्रीपूर्णानंदमौनींद्रं नेपालनृपदेशिकम्।
अव्याहतस्वसंचारं संश्रयामि जगद्गुरुम्॥ ५५॥

महादेवश्च तच्छिष्यश्चंद्रशेखरयोग्यपि।
स्तां मे हृदि सदा धीरावद्वैतमतदेशिकौ॥ ५६॥

प्रवीरसेतुभूपालसेवितांघ्रिसरोरुहान् ।
भजे सदाशिवेंद्रश्रीबोधेश्वरगुरून् सदा॥ ५७॥

सदाशिवश्रीब्रह्मेंद्रधृतस्वपदपादुकान् ।
धीरान् परशिवेंद्रार्यान् ध्यायामि सततं हृदि ॥५८॥

आत्मबोधयतींद्राणाम् आशीताचलचारिणाम्।
अन्यश्रीशंकराचार्यधीकृतामंघ्रिमाश्रये ॥५९॥

भगवन्नामसाम्राज्यलक्ष्मीसर्वस्वविग्रहान्।
श्रीमद्बोधेंद्रयोगींद्रदेशिकेंद्रानुपास्महे ॥६०॥

अद्वैतात्मप्रकाशाय सर्वशास्त्रार्थवेदिने।
विधूतसर्वभेदाय नमो विश्वातिशायिने॥६१॥

आ सप्तमाज्जीर्णपर्णजलवातारुणांशुभिः।
कृतस्वप्राणयात्राय महादेवाय सन्नतिः॥६२॥

चोलकेरलचेरौड्रपांड्यकर्णाटकोंकणान्।
महाराष्ट्रांध्रसौराष्ट्रमगधादींश्च भूभुजः॥६३॥

शिष्यान् आसेतुशीताद्रि शासते पुण्यकर्मणे।
श्रीचंद्रशेखरेंद्राय जगतो गुरवे नमः॥६४॥

निष्पापवृत्तये नित्यनिर्धूतभवक्लृप्तये।
महादेवाय सततं नमोऽस्तु नतरक्षिणे॥६५॥

श्रीविद्योपासनादार्ढ्यवशीकृतचराचरान्।
श्रीचंद्रशेखरेंद्रार्यान् शंकरप्रतिमान् नुमः॥६६॥

श्रीकांचीशारदापीठसंस्थितानाम् इमां क्रमात्।
स्तुतिं जगद्गुरूणां यः पठेत् स सुखभाग् भवेत्॥६७॥

## ॥परिशिष्टम् - १॥

(अत्र १-४ पद्यानि पोलहग्रामाभिजनैः श्रीरामशास्त्रिभिः प्रकाशितानि। ५ पद्यं नवषष्टितमैः पीठाधिपतिभिः श्रीमज्जयेंद्रसरस्वतीश्रीपादैः रचितम्। ६-७ पद्ये शिमिलिग्रामाभिजनैः राधाकृष्णशास्त्रिभिः विरचिते।)

कलानंदपरब्रह्मानंदानुभवतुंदिलान्।
महादेवेंद्रयमिनः सततं संश्रये हृदा॥ ६८॥

प्रतिदिनविहितश्रीचंद्रमौलीश्वरार्चा-
प्रसितसकलदेहः प्रौढपुण्यानुभावः।
मनसि सततमास्तां श्रीमहादेवनामा
मम गुरुरितकांचीशारदापीठसीमा॥ ६९॥

अतिबाल्यविधृतसंयमविमलमनःसेवितेशचरणयुगान्।
श्रीचंद्रशेखरेंद्रान् सांप्रतमाचार्यशेखरान् प्रणुमः॥ ७०॥

लक्ष्मीनारायण इति पूर्वाश्रमनामभूषितं शांतम्।
ऋग्वेदे सम्यगधीतिनं महादेवमाश्रयामि गुरुम्॥ ७१॥

अपारकरुणासिंधुं ज्ञानदं शांतरूपिणम्।
श्रीचंद्रशेखरगुरुं प्रणमामि मुदाऽन्वहम्॥ ७२॥

परित्यज्य मौनं वटाधःस्थितिं च
व्रजन् भारतस्य प्रदेशात् प्रदेशम्।
मधुस्यंदिवाचा जनान् धर्ममार्गे
नयन् श्रीजयेंद्रो गुरुर्भाति चित्ते॥ ७३॥

नमामः शंकरान्वाख्यविजयेंद्रसरस्वतीम्।
श्रीगुरुं शिष्टमार्गानुनेतारं सन्मतिप्रदम्॥ ७४॥

सत्यनारायणक्षेत्रात् सत्यव्रतमुपागतम्।
आश्रये कामकोटीशं सत्यश्रीचंद्रशेखरम्॥ ७५॥

❀❀❀